# नञर्थविमर्शः

**जगन्नाथशर्मा (विद्यावारिधिः)**

*सहप्राध्यापकः, महेशसंस्कृतगुरुकुलविद्यापीठम्*

jagannathsharma9847@gmail.com

**शोधसारः**

*वेदाङ्गेष्वभ्यर्हिततमं व्याकरणं शक्तिग्राहकशिरोमणित्वेन सुप्रथितं लक्ष्यैकमात्रचक्षुष्केन पाणिनिना प्रणीतं कात्यायनपतञ्जलिभिर्महर्षिभिः अतितरामभिवर्धितं महत उपकाराय समजायत । कालक्रमेण व्याकरणमिदं वृत्तिकारदीक्षितादिभिः समाश्रितं दर्शनान्तरतौल्यं भेजे । तत्र शाब्दबोधप्रक्रियायां दर्शनान्तरापेक्षया व्याकरणमिदं त्रिमुनिसम्मतं पृथग्पन्थानमनुसरतीति तु नाविदितं विपश्चिताम् । वैयाकरणाश्च तस्मिन्नेव मार्गे चलन्तः तत्तच्छक्तिविचारानुपस्थापयन्ति । तत्र विशेषतः कौण्डभट्टकृते वैयाकरणभूषणसारे एवं नव्यव्याकरणेष्वग्रणी-नागेशभट्टविरचितायां मञ्जूषायाञ्च धात्वर्थ-निपातार्थ-तत्तत्पदशक्तिविचाराश्च नैकधा परमतखण्डनपुरस्सरं व्यधायिषत । एवमेव नञर्थविचारोऽपि तत्र ग्रन्थेषु विवेचितो दृश्यते । नञर्थः कः? नञोऽभावार्थकत्वे कः दोषः? किं भाष्याभिप्रेतम्? नञः द्योतकत्वमुत वाचकत्वम् । आरोपितत्वं नञर्थः इत्यत्र किं प्रमाणम्? सर्वदर्शनविरुद्धतया आरोपितत्वं नञर्थः इति स्वीकारे किमौचित्यमित्येते विचारा अत्र समुपस्थापिता वर्तन्ते । एतत्शोधपरिशीलनेन च पूर्वोक्ताः विषयाः सुस्पष्टं विज्ञातुं शक्याः ।*

**विशिष्टशब्दाः**

अभावः, अल्पता, भेदः, विरोधः, सादृश्यम् ।

## १. विषयप्रवेशः-

लोकेऽस्मदनुभूयमानं शाब्दबोधं प्रति तत्तत्पदनिष्ठवृत्तिज्ञानस्य कारणत्वमङ्गीक्रियत इति तु निश्चप्रचं सुविदितं विपश्चिताम् । तदेवोपजीव्य बहुभिर्विद्वद्भिरनेकशः विचाराः तत्तत्पथाबलम्बनेनाकारिषत, परन्तु व्यवहारसूक्ष्मतानभिज्ञानां विकल्पग्रस्तचेतसामस्माकं शब्दापारावारपारीणैस्तत्रभवद्भिर्भाष्यकारादिभिरुपपादिताः श्रीभर्तृहरिप्रभृतिभिश्च विशदीकृताः सिद्धान्ता एव प्रमाणानि । तथाहि- सूक्ष्मतः सूत्रभाष्यादिपरंपरामाश्रित्य नञर्थविचारे क्रियमाणे 'अभावो नञर्थः' इति नैयायिकाद्युक्तमसमञ्जसमिति तत्तद्वासनया विप्रतिपन्नबुद्धीनां विचिकित्साचिकित्सालयरूपेण वैयाकरणसिद्धान्तानुसारेण नञ्शक्तिनिरूपणमत्यावश्यकमिति मन्वानैः विलक्षणधिषणालङ्कृतैर्दीक्षित-नागेश-कौण्डभट्टादिभिः वैयाकरणभूषणसारमञ्जूषादिग्रन्थेषु सरलया शैल्या भूयिष्ठया विवरणपद्धत्या दर्शनान्तरीयमतान्तरमनूद्य स्वमतं विशदीकृतम्। तत्पथमेवावलम्ब्य मयात्र लेखे नञर्थविचारः प्रस्तूयते-

## २.नञ्पदार्थपरिचय:-

नञ: प्रकरणानुरोधेन बह्वर्थकत्वं लोके प्रसिद्धम् । किञ्च नञ: द्योतकत्वमुत वाचकत्वमित्यपि बहूनां विकल्पग्रस्तम्। तत्रादौ नञ: षडर्था: प्राचीनैरुदाहृता:। तथा हि-

*तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।*

*अप्राशस्त्यं विरोधश्च नञर्था: षट् प्रकीर्तिता: ॥(शास्त्री, सन् २०१६, पृ.५३५)*

### • तत्सादृश्यम्-

नञ: स्वान्वयितावच्छेदकावच्छिन्नसादृश्यबोधकत्वं कदाचित् । यथा- अब्राह्मणमानय इत्यादौ । अत्र नञा सादृश्यमर्थ उस्थाप्यते , ब्राह्मणसदृशमानयेति बोधप्रकार: । अत एवोक्तं भाष्यकृता- "नञ्युक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते तथा ह्यर्थो गम्यते। तद्यथा - लोके अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशमानयति, नासौ लोष्टमानीय कृती भवति"(महाभाष्यवचनम्, ३.३.१९)। तथा चात्र नञा सादृश्यार्थस्योपस्थिति:।

### •अभाव:-

क्वचिन्नञ: स्वान्वयिपदार्थप्रतियोगिकाभावबोधकत्वम्। यथा- अपापमित्यादौ। पापाभाव इति बोध:। अत्र नञा समभिव्याहृतपापपदार्थप्रतियोगिकात्यन्ताभाव उपस्थाप्यते।

### • तदन्यत्वम्-

'अनश्व:' इत्यादौ भेदविशिष्टार्थो नञ्वाच्य:। भेदश्च प्रत्यासत्या स्वान्वयिपदार्थप्रतियोगिक एव। तथा च ' अनश्व:' इत्यस्मात् 'अश्वप्रतियोगिकभेदवान्' इत्यर्थ: प्रतीयते । अब्राह्मण इत्यादौ सादृश्यघटकतयाऽन्यत्वबोध:, न तु केवलान्यत्वबोध:। अनश्व इत्यत्र तु केवलान्यत्वबोध इति विशेष:।

### •तदल्पता-

'अनुदरा कन्ये'त्यादौ अल्पत्वं नञा उपस्थाप्यते । अभावार्थस्त्वत्र बाधित एव । तथा च अल्पपरिमाणकोदरविशिष्टा स्त्री एतद्वाच्या । वस्तुतस्तु अल्पत्वं न नञर्थ:, उदाराभावस्य बाधितत्वेन अल्पोदरविशिष्टेत्यर्थबोधस्तु मानस इति केचित्।

### •अप्राशस्त्यम्-

'अपशवो वा अन्ये गोऽश्वेभ्य:' इत्यादौ नञोऽप्राशस्त्यमर्थ: । अनेन हि वाक्येन गवामश्वानाञ्च प्राशस्त्यबोधनार्थन्तदितरेषां पशुत्वं निन्द्यते। तथा च अन्येऽपशव: इत्यत्र नञा अप्राशस्त्यार्थस्योपस्थिते: गोभ्योऽश्वेभ्यश्च अप्राशस्त्यं तदितरेषां विज्ञायते। एवञ्चात्र नञोऽप्राशस्त्यमर्थ:।

### •विरोध:-

'असुरा:' ' अधर्म:' इत्यादौ विरोध: नञ्वाच्यार्थ: । नह्यत्र असुरादिशब्दै: सुरभिन्ना: मनुष्यादय: विवक्षिता:, अपि तु तद्विरोधिन: दानवा:। एवञ्चात्र नञा विरोधार्थ उपस्थाप्यते।

एवं नञः षडर्थाः प्राचीनैः स्वीक्रियन्ते । किञ्च यत्र नञ्द्वयोपादानम्, तत्र प्रकृतार्थदार्ढ्यबोधकत्वन्तस्य । शाब्दस्तु न तथा बोधः, परन्तु तदभावाभावत्वेन तस्यैव बोधने तद्दार्ढ्यबोधकत्वं पर्यवस्यतीति मानसः स बोधः । 'येन नाप्राप्ते-" इति परिभाषायां ' प्रकम्पयामास न मानसं न सः' इत्यादिकाव्यग्रन्थेषु च दृष्टपूर्वमेवैतत् । ननु नञः समभिव्याहृतपदार्थप्रतियोगिकाभावः वाच्यार्थः? उत द्योत्यार्थः? इति चेत्- नञः वाचकत्वमेव । अन्यथा 'यद् द्योत्यम् तद्विशेषणमिति ' नञर्थाभावस्य विशेषणतापत्तिः । इष्यते च तस्य विशेष्यत्वमेव, अतो वाचकत्वन्तस्यास्थेयमिति सामान्यतो निर्णयः । अथवा द्योत्यार्थस्य विशेषणत्वमेवेति नियमस्त्यज्यते, तथा च द्योत्यार्थत्वेऽपि न दोषः ।

वस्तुतस्तु नञः नैते षडर्थाः, अपि तु अभावः, आरोपितत्वं वार्थः । सादृश्यादिविषयकबोधस्तु पाश्चात्कालिकः मानसः । वैयाकरणसिद्धान्तु 'आरोपितत्वं नञर्थः' इत्येव, नञ्सूत्रस्थभाष्यप्रामाण्यादित्यग्रे विविच्यते ।

## ३. शोधस्य समस्या-

भूषणसारमञ्जूषादिग्रन्थेषु वैयाकरणसिद्धान्तरूपेण प्रतिपादितेषु विषयेषु नञर्थं विचारयितुं लेखोऽयं प्रस्तुतो विद्यते । प्रकृतलेखोपस्थापनात्पूर्वं समुपागताः समस्या इमाः वर्तन्ते-

क) नञर्थविषये वैयाकरणाभिप्रेतः सिद्धान्तः कः, किञ्च तत्र प्रमाणम् ?

ख) कश्च नैयायिकाद्यनुसारेण नञर्थस्वीकारे दोषः?

ग)भूषणकारनागेशभट्टयोर्मते कुत्र नञः शक्तिः?

## ४.शोधस्योद्देश्यम्-

महतो महीयसः शब्दशास्त्रस्य पाणिन्युपज्ञस्य शब्दसाधुत्वनिर्णायकत्वे शाब्दबोधहेतुभूतशक्तिज्ञानजनकत्वे चास्ति महत्स्थानमित्यत्र नास्ति किञ्चित्वक्तव्यम् । शास्त्रस्यास्य विवरणसरण्यामवलोक्यमानायामार्थिकभागे तत्तत्प्रकृति-प्रत्यय-समासादिशक्तिविचारः बहुधा नैकेषु ग्रन्थेषु प्रतिपादितो दृश्यते । तथैव नञ्पदशक्तिविचारोऽपि फणिभाषितभाष्याब्धेः समुद्धृत्य नैकधा दीक्षितादिभिरुल्लिखितः । सन्दर्भेऽस्मिन् प्रकृतलेखोऽपि बहूनां शब्दशास्त्रीयपथानुगां नञ्पदार्थजिज्ञासूनाञ्चोपकाराय कल्पते । किञ्च पूर्वं समुपस्थापितानां शोधसमस्यानां समाधानं लेखस्यास्य मुख्यमुद्देश्यं भवति । एवञ्च शोधोद्देश्यानि निम्नाङ्कितानि वर्तन्ते -

क)नञर्थविषये वैयाकरणमतप्रदर्शनपूर्वकं तन्मते प्रमाणौचित्ययोरुपस्थापनम् ।

ख) नैयायिकादिमतानुसारेण नञर्थस्वीकारे दूषणदानम् ।

ग) भूषणकारनागेशभट्टयोर्मतानुसारं नञर्थविचारसमीक्षणम् ।

## ५. शोधस्य सैद्धान्तिकी अवधारणा-

व्याकरणशास्त्रस्य प्रक्रियाभाग-आर्थिकभागाभ्यां सामान्यतः विभागः कर्तुं शक्यते । तत्र बहवः विद्वांस आदौ प्रक्रियाज्ञानं सम्पाद्यार्थिकभागे न तथा जिज्ञासां प्रकटयन्ति । अतोऽपि दर्शनान्तरीयास्तत्र तत्र शाब्दिकमतमुपस्थाप्य नैकधा निराचक्रुः । एवं स्थिते दीक्षितकौण्डभट्टनागेशादिभिः तेषां मतनिवारणपुरस्सरं पाणिन्यादिमहर्षिसम्मततया वैयाकरणमतं सुस्पष्टीकृतम् । तत्र समासशक्तिविचारः, स्फोटविचारः, धात्वर्थविचारः, आख्यातार्थविचारः, लकारार्थविचार इत्येवं नैकधा परमतखण्डनपुरस्सरं शाब्दिकमतव्यवस्थापनञ्च कृतम् । एवं प्रकारेणैव नञ्पदार्थविषयेऽपि दर्शनान्तरीयाः भाष्याशयमजानानाः नञर्थमन्यथैव विवृण्वन्ति स्म, तदा भूषणमञ्जूषादिग्रन्थे

त्रिमुन्यभिप्रेत: नञर्थ: सप्रमाणमुपपादित: । अयमत्र सिद्धान्त:-'अभावो नञर्थ:' इति नैयायिकाद्युक्तमसमञ्जसमेव, अपि तु नञ्सूत्रस्थभाष्यप्रामाण्यात् भर्तृहरिसम्मतत्वाच्च आरोपितत्वमेव नञर्थ: ।

## ६. अध्ययनविधि:-

नञर्थविचारसमीक्षणसन्दर्भेऽत्र तुलनात्मकविधिराश्रितो विद्यते । एवमत्र तत्तन्मतनिरूपणावसरे विश्लेषणविधि:, विवरणात्मकशैल्या समीक्षणात्मकाश्च विधयोऽत्र समाश्रिता: वर्तन्ते ।

## ७. सामग्रीसङ्कलनप्रस्तुति:-

'नञर्थविचार:' इति विषये प्रस्तुतशोधकार्यस्य सम्पादनाय कौण्डभट्टकृतवैयाकरणभूषणसार:, नागेशभट्टविरचितलघुमञ्जूषेत्यादीनां ग्रन्थानां, तद्व्याख्यानग्रन्थानाञ्च लेखसामग्रीरूपेण सङ्कलनं कृतं वर्तते । एवमेव वाक्यपदीयम्, महाभाष्यम्, शेखरादिग्रन्थाश्चात्र लेखे सहायकरूपेणोपयुक्ता: वर्तन्ते ।

## ८.परमते दोषोद्भावनपुरस्सरं वैयाकरणमतनिरूपणम्-

अघट इत्यादौ समासघटकनञ आरोपितत्वं द्योत्योर्थ इति तस्मादारोपितघटत्ववानिति बोधो जायते । एवं चोत्तरपदार्थप्राधान्यात् तत्पुरुषत्वमुपपद्यते । यदि त्वत्रापि नञोऽभावार्थकत्वमङ्गीक्रियेत तर्हि अभावस्य प्रतियोगिनिरूपितविशेष्यतया भाननियतत्वेन घटप्रतियोगिकाभावः इति बोधापत्या भाष्योक्तोत्तरपदार्थप्राधान्यव्याघातात् तदनुपपत्तिः प्रसज्येत । अपि च" असर्वस्मै," "असः” इत्यदौ सर्वादीनामितरविशेषणत्वेनार्थोपस्थाकत्वरूपोपसर्जनत्वादसर्वनामत्वापत्या सर्वादिगणकार्यं स्मायादिकम्, अन्तर्गणकार्यं त्यदाद्यत्वादिकञ्च न स्यात् ।

अथारोपितत्वमारोपविषयत्वम् । तत्रारोपमात्रं नञ्वाच्योऽर्थः, विषयत्वन्तु संसर्गः । एवं च नामार्थयोरभेदान्वयव्युत्पत्तिः निपातातिरिक्तनामार्थविषयेति अब्रह्मणादिपदात् विषयतासम्बन्धेनाऽऽरोपविशिष्टब्राह्मण्यः क्षत्रियादिर्बोध्यत इति नञ आरोपितत्वद्योतकत्वं न युज्यते इति चेन्न । ब्राह्मणादिपदानां केवलानां क्षत्रियादिवाचकत्वाभावेन मुख्यं ब्राह्मण्यादिकमेव प्रवृत्तौ निमित्तमित्यनारोपितब्राह्मण्यादिमति शक्तत्वाभ्युपगमस्यावश्यकतया तत्र विषयतयाऽऽरोपान्वयस्य दुर्घटत्वात् । आरोपविषयत्वे शक्त्यभ्युपगमेऽपि स एव दोषः । नञ आरोपितत्वद्योतकत्वे तु नायं दोषः । अनारोपितब्राह्मणत्वादिवत् आरोपितब्राह्मणत्वादेरपि ब्राह्मणादिपदार्थत्वात् , माणवकादिपदस्य स्वसमभिव्याहृतसिंहादिपदस्यारोपितसिंहत्वादिमद्बोधकत्वे इव नञः स्वसमभिव्याहृतब्राह्मणादि-पदानामारोपितब्राह्मणत्वादिमद्बोधकत्वे तात्पर्यग्राहकत्वात् । तत्र प्रसिद्धार्थपरित्यागः, अप्रसिद्धार्थपरिग्रहः इत्युभयमपि द्योतककृत्यमिति बोध्यम् । एवं चात्र ब्राह्मणभिन्ने सादृश्यादिवशात् कृतस्य ब्राह्मण्यारोपस्य सादृश्यमूलकत्वात् ब्राह्मणभिन्नः ब्राह्मणसदृशः इत्यर्थः पर्यवस्यति । अनुदरा कन्या इत्यादावुदराल्पत्वेन तदभावमारोप्य नञ्समभिहारे आरोपितोदरविशिष्टबोधे तन्मूलोदराल्पत्वादौ पर्यवसितार्थविश्रान्तिः। इत्थं च नत्रो यन्मूलारोपद्योतकत्वे तात्पर्यग्राहकत्वं, तन्मूलार्थप्रतीतौ शाब्दबोधोत्तरं प्रकरणादिवशात् जायमानायां प्रयोजकत्वात् तत्तदर्थबोधकत्वव्यवहार इति -

*तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।*
*अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥ (शास्त्री,,सन् २०१६, पृ.५३५)*

इत्युक्तिरपि यथाकथञ्चित्समर्थयितुं शक्यते । एवञ्च नञ आरोपितत्वमेव अर्थः, सोऽपि द्योत्यः । सादृश्यादिप्रतीतिस्तु तत्तद्विशेषसन्निधाने पाश्चात्कालिकी मानसिकीति बोध्यम् । न च नञ्तत्पुरुषे उत्तरपदस्य तादृशा-प्रसिद्धार्थबोधकत्वे नञस्तात्पर्यग्राहकत्वमात्रोक्तौ नैरर्थक्यप्रसङ्गादुत्तरपदार्थप्राधान्यं तत्र दुरुपपादम्। किञ्च नञ्विशिष्टपदस्य शक्तत्वाभावेनैकार्थीभावरूपसामर्थ्यमपि तत्र न स्यात् । पृथगर्थानां पदानां सम्भूयैकार्थप्रतिपादकत्वं ह्येकार्थीभाव इति वाच्यम् । तत्र नञ्द्योत्यारोपितत्वस्य विशेषणतया भानात् द्योत्यार्थमादायैवोत्तरपदार्थप्राधान्यस्योपपादनीयत्वात् । समासविधायकशास्त्रबलात् नञ्समभिहारं विनाऽऽरोपितत्वविशिष्टार्थस्याप्रतीयमानत्वाच्च विशिष्टानुपूर्व्या एव द्योत्यार्थान्तर्भाविण शक्ततावच्छेदकत्व-कल्पनया विशिष्टस्यार्थवत्वादेकार्थीभावरूपसामर्थ्यस्याप्यक्षतेः । अनुभवतीत्यादौ त्वन्वादेरनुभवाद्यर्थ- द्योतकत्वेऽपि न विशिष्टस्य शक्तत्वं कल्प्यते, किन्तु भ्वादिमात्रस्य । अन्यथा विशिष्टस्य क्रियावाचकत्वसम्भवेऽपि गणे पाठाभावेन, अवयवस्य च तादृशक्रियावाचकत्वाभावेन धातुत्वाभावात् कर्मणि लकाराद्यनुपपत्तिः । अन्वभवदित्यादावडादेरव्यवस्थापत्तेश्च । व्याकरणस्यावयवशक्तिबोधनद्वारा समुदायनिष्ठशक्तिग्राहकत्वेन तदनुसारित्वादीदृशकल्पनायाः नाप्रामाण्यम् । वस्तुतः वाक्य एव शक्तिः, लोकानां तत एव बोधादित्यन्यदेतत् ।

असन्देहः इत्यत्रारोपितसन्देह इति बोधः । अत्रारोपस्य संसर्गाभावमूलकत्वेन प्रकरणादिवशात् सन्देहात्यन्ताभावस्य, तत्प्रागभावादेर्वा प्रतीतिः । अनेन वार्तिकप्रामाण्येन अभावोऽपि नञर्थ एवेति परास्तम् । एवञ्च "रक्षोहागमलघ्वसन्देहा" इत्यत्र सन्देहप्रागभावः प्रतीयमानोऽर्थः, न शाब्दः । "असन्देहार्थं चाध्येयं व्याकरणम्" इति भाष्ये "सन्देहप्रागभावोऽत्र द्रष्टव्यः" इति व्याख्याता कैयटोऽपि एतदाशयक एव । नन्वत्र नञोऽभाव एवार्थो भवतु । तथा च तत्र सन्देहस्य प्रतियोगितानिरूपकत्वेनान्वयात् सन्देहाभाव इति बोधः सूपपादः । यदि तु नञर्थाभावस्य घटो नास्तीत्यादाविव क्रियान्वयित्वनियमेनोत्तरपदार्थानन्वयित्वात् तादृशबोधो दुर्वच इत्युच्यते, तर्हि "प्रसज्यक्रियागुणौ ततः पश्चान्निवृत्तिं करोति" इति नञ्सूत्रस्थभाष्यप्रामाण्येन प्रसज्यप्रतिषेधस्थले नञर्थाभावस्य गुणान्वयित्वस्यापि स्वीकरणीयतया प्रकृते उत्तरपदार्थभूतसन्देहरूपगुणान्वयित्वस्य सुवचत्वान्नैतादृशबोधो दुर्लभ इति । अत एव "नास्माकमेकं प्रियम्", "न सन्देहः" इत्यादौ एकप्रियसन्देहादिप्रतिषेधो बोध्यते । एतद्भाष्यप्रामाण्यादेव बहवः "प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्" इत्यत्र क्रियाग्रहणं गुणस्याप्युपलक्षणमित्याहुरिति चेन्न । तथा सति पूर्वपदभूतनञर्थस्य प्राधान्यापत्तौ समासस्याव्ययसंज्ञाऽऽपत्तेः । समासस्य स्वरादौ पाठाभावेऽपि नञः स्वरादौ पाठेनाव्ययतया तदर्थस्य समासे प्रधानीभूतस्य लिङ्गसङ्ख्याद्यन्वययोगासम्भवात् । यदि तु केवलनञो लिङ्गाद्यनन्वय्यर्थकत्वेऽपि समासघटकस्यातथात्वं, शब्दशक्तिस्वभावात् , अतो नाव्ययत्वप्रसक्तिरित्युच्यते, तदा नञ्तत्पुरुषस्य भाष्योक्तोत्तरपदार्थप्राधान्यव्याघातापत्तिः पूर्वोक्त एव दोषः । तथा च असर्वस्मा इत्यादौ सर्वनामत्वानुपपत्तिः, अनेकमित्यत्र एकप्रतिषेधे द्विबहूनां प्रतीत्या एकवचनानुपपत्तिः, अत्वं भवसि, अनहं भवामि इत्यादौ त्वदभावोऽस्तीत्यादाविव युष्मदादिसामानाधिकरण्याभावात् पुरुषव्यवस्थाऽनुपपत्तिः, अवर्षा हेमन्तः, अनर्थः स्त्री इत्यादौ न्यायसिद्धपरवल्लिङ्गत्वानुपपत्तिरित्येवमादयो बहवो दोषाः प्रसज्येरन् ।

## आक्षेपः-

ननु पूर्वपदार्थप्राधान्येऽपि "असर्वस्मा" इत्यादौ न दोषः । तथा हि - "एतत्तदोः सुलोपोऽकोरनञ्समासे हलि"(पाणिनिसूत्रम्.६.१.१३२) इत्यत्रानञ्समासे इति पर्युदासेन नञ्समासे सर्वनामप्रयुक्तकार्यस्य, उत्तरपदार्थप्रयुक्तकार्यस्य वा ज्ञापनात् । अन्यथा अकोरित्यकच्सहितयोस्तयोर्व्यावृत्या तत्र सर्वनाम्नोरेव ग्रहणावश्यकतया

"असः" इत्यादौ सर्वनामत्वाभावे तद्वैयर्थ्यं स्पष्टमेव । अत एव अत्वं भवसीत्यादौ पुरुषव्यवस्था । तत्र त्वद्भिन्नादौ युष्मदादेर्लक्षणा, नञ् तु तात्पर्यग्राहक इति त्वद्भिन्नादिरूप- युष्मदाद्यर्थस्याभेदेन तिर्थान्वयित्वात् युष्मदादेः तिङ्सामानाधिकरण्यस्यापि सुवचत्वाच्च । न च "अनेकमन्यपादार्थे(पाणिनिसूत्रम्.२.२.२४)" इत्यत्र कथमेकवचनमिति वाच्यम्, "सुबामन्त्रिते"(पाणिनिसूत्रम्.२.१.२) इत्यतोऽनुवृत्तसुबितिविशेष्यानुसारेण 'यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य, तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापी'ति नियमेनादोषात् एवमेव

*"वर्जयन्त्या जनैस्सङ्गमेकान्तत*
*स्तर्कयन्त्या सुखं सङ्गमेकान्ततः ।*
*योषयैव स्मरासन्नतापाङ्गया,*
*सेव्यतेऽनेकया सङ्गतापाङ्गया" ।।शिशुपाल.व.४/४२।*

इति माघश्लोकेऽप्यनेकयेत्यत्र योषया इत्यस्य विशेष्यत्वादेकवचनम् । विशेषणवाचकशब्दोत्तरवचनस्य विशेष्यानुरोधित्वनियमात् । विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसङ्ख्याविरुद्धसङ्ख्यायाः विवक्षायान्तु नैवं विशेषणवाचकपदोत्तरवचनस्य विशेष्यानुरोधित्वनियमः, 'वेदाः प्रमाणम्' इत्यादौ यथा इति त्वन्यदेतत् । अत एव "पतन्त्यनेके जलधेरिवोर्मयः" (द्विवेदी,सन्१९८५,पृ.४५१) इत्यत्र बहुवचनोपपत्तिः । "अवर्षा हेमन्तः" इत्यादौ हेमन्तादिगतलिङ्गाभावस्तु "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति वचनबलात्, लिङ्गस्य लोकाश्रयत्वाद्वा । एवं च "अघटः" "असन्देहः" इत्यादौ अन्योन्याभावत्वादिना नञ्पदशक्यत्वात् साक्षादेव घटभेदादिविषयकबोधो निष्प्रत्यूहः इति चेन्न ।

## समाधानम्-

अनेकमित्यादौ विशेष्यानुरोधेनैकवचनस्योपपादने "अवर्षा हेमन्तः" इत्यत्र भाष्यसम्मत- बहुवचनानुपपत्तेः । स्वगतान्यसङ्ख्यासत्वेऽपि विशेष्यगतसङ्ख्यया वचनं भवतीत्यत्रानुशासनाभावाच्च । उत्तरपदार्थप्राधान्याभ्युपगमे तु तदर्थगतासङ्ख्यानुरोधेन वचनव्यवस्था सिध्यतीति तत्र बहुवचनोपपत्तिः । एतदेवाभिप्रेत्य नञ्सूत्रभाष्ये "इदं खल्वपि भूय एवोत्तरपदार्थप्राधान्ये सति सङ्गृहीतं भवति । किम् ? अनेकमित्यत्रैकवचनम्" इत्युक्तम् । अत एव "यद्यनपो होम्यद्रव्यं श्रद्धां नामावतारयेत्" इति तदन्तरप्रतिपत्यधिकरणस्थशाङ्करभाष्यप्रयोगोऽपि सुष्पूपपद्यते । "पतन्त्यनेके" इति त्वसाध्वेवेति इति नागेशोपाध्यायाः । एवं च "अनञ्समासे" इत्यनेन नञ्तत्पुरुषे उत्तरपदार्थप्राधान्यमित्यस्यैव ज्ञापनमुचितम् । अत्वं भवसीत्यादौ युष्मदादेस्त्वद्भिन्नादौ लक्षणया तिङ्समानाधिकरण्योपपादनमप्ययुक्तम्। समास एकार्थीभावरूपसामर्थ्यसत्वात् विशिष्टस्यैव तादृशार्थे शक्तत्वस्य वक्तव्यतया न लक्षणावसरः । एवं च विशिष्टस्यैव तिङ्गामानाधिकरण्यं, न तु युष्मदादेरति पुरुषाव्यवस्थापत्तिर्दुवारैव । अस्मन्मत उत्तरपदार्थप्राधान्यात् न सा । विशिष्टार्थस्य तिङर्थाभेदान्वयित्वे विशेष्यस्यापि तत्सत्वेन नञ्विशिष्टस्य तिङ्गामानाधिकरण्ये विशेष्यसमर्पकयुष्मदादेरपि तत्सत्वादिति ।

## ८.१ नञोऽन्योन्याभावार्थकत्वनिरासः -

घटः पटो न इत्यादावप्यारोपितत्वं नञर्थः । आरोपितपटत्ववान् घटः इति बोधः । पटप्रतियोगिकभेदवान् घट इति प्रत्ययस्तु पश्चाज्जायमानो मानसः । न चात्र भेदो नञ्वाच्योर्थः, तस्मिन् पटस्य प्रतियोगितयाऽन्वयः । यदि गृहस्योच्चैरित्यादिवत् प्रतियोगिसमर्पकात् पटपदात् षष्ठ्यापत्तिरित्युच्यते, तर्हि पटपदस्य पटप्रतियोगिके लक्षणामाश्रित्य तदर्थस्याभेदेन भेदेऽन्वयः । भेदस्य चानुयोगितया घटेऽन्वयः । नञः निपातत्वेन

निपातातिरिक्तनामार्थयोरेवाभेदान्वयव्युत्पत्तेः तदर्थस्य भेदेनान्वयस्य स्वीकर्तुं शक्यत्वात् । एवं हि तत्र नामार्थस्य प्रतियोगितयाऽन्वयस्य स्वीकर्तुं शक्यत्वे मा भूत् पटपदे लक्षणा । अथ वा नञः केवलभेदबोधकत्वस्यादृष्टचरत्वात्, निपातानामनेकार्थत्वाद्वा भेदवानेवार्थः । तस्याभेदेन घटेऽन्वयः । एवं च पटप्रतियोगिकभेदवान् घट इत्याकारकबोधः शाब्द एवास्तु इति वाच्यम् । तथा सति अघट इति समासात् आरोपितघटत्ववतः, न घट इति तदीयविग्रहवाक्याच्च घटप्रतिगिकभेदस्य च बोधे वृत्तिविग्रहयोः समानार्थकत्वभङ्गापत्तेः । किञ्च "यजतिषु ये यजामहं करोति नानुयाजेषु" इत्यत्रानुयाजपदार्थस्य विशेषणतया नञर्थभेदान्वयित्वे यजतिपदार्थान्वयित्वाभावेन सप्तम्या असाधुत्वापत्तेः । एवं "न ब्राह्मणैरेतैरुपद्रुतम्" इत्यादौ भेदप्रतियोग्यनुयोगिवाचकयोः समानविभक्तिकत्वं दुरुपपादम् । न च नञा भेदबोधने प्रतियोग्यनुयोगिवाचकपदयोः समानविभक्तिकत्वं तन्त्रम् । अत एव भूतले न घटः इत्यादिवाक्ये नञो न भेदबोधकत्वम् । तथा चानुयाजादिशब्देभ्यः न सप्तम्यादेरसाधुत्वापत्तिरिति वाच्यम् । तत्र नञ आरोपितत्वद्योतकत्वेऽनुयाजादिपदानामारोपितानुयाजादिबोधकत्वेन यजत्यादिना सामानाधिकरण्यात् क्लृप्तेनैव समानाधिकरणयोः समानविभक्तिकत्वनियमेन सप्तम्यादेः साधुत्वोपपत्तौ तादृशनियमान्तरकल्पने प्रमाणाभावात् । अपि च नञ आरोपितत्वद्योतकत्वे कटं भीष्ममुदारं करोतीत्यत्र "कटोऽपि कर्म, भीष्मादयोऽपीति भीष्मादिपदे कर्मणीत्येव द्वितीया भविष्यति इत्यनभिहितसूत्रस्थ(श्रीभार्गव,सन्२०२३,पृ.४७९) भाष्यरीत्याऽनुयाजशब्दादधिकरण एव सप्तम्युपपादयितुं शक्या । तस्य प्रतियोगितयाऽनुयाजपदार्थान्वयिभेदार्थकत्वे त्वधिकरणे सा न स्यात् । एवञ्चार्थिकार्थमादाय "अनुयाजभिन्नेषु यजतिषु ये यजामहं करोति" इति पर्युदासत्वोक्तिरपि न विरुध्यते ।

## ८.२ पूर्वपक्षिमतनिरासः-

यत्तु अघट इत्यादौ भेदस्यैव नञ्वाच्यत्वमुपेयताम् । नञ्सूत्रस्थ "निवृत्तपदार्थकः" इति तद्भाष्याशयात् । निवृत्त इति भावे क्तः, भेदोऽर्थः । तत्पदार्थकः नञिति भाष्यतो लाभात् । तथा च तत्र नञर्थभेदस्योत्तरपदार्थे विशेषणतयाऽन्वयादुत्तरपदार्थप्राधन्यस्य सत्वात्तत्पुरुषत्वोपपत्तिः । अत एव असर्वस्मै, अनेकमित्यादौ च न पूर्वोक्तदोषावकाश इत्याहुः । तन्न । अघट इत्यादौ यत्किञ्चिन्निष्ठभेद उत्तरपदार्थान्वयितया बोध्यते ? उत यत्किञ्चित्प्रतियोगिकभेदः ? आहोस्वित् प्रत्यासत्या घटप्रतियोगिकभेदः ? आद्ये "अघटमानय" इत्युक्ते यत्किञ्चिदनुयोगिकस्य, द्वितीये यत्किञ्चित्प्रतियोगिकस्य घटस्यैवानयनापत्तेः । तृतीये घटत्वावच्छिन्नरूपोत्तरपदार्थे घटप्रतियोगिकभेदासंभवादनन्वयापत्तेः । अत एव भाष्ये नञ्तत्पुरुषस्योत्तरपदार्थप्राधान्ये "अब्राह्मणमानय" इत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोतीत्याशङ्क्य, राजपुरुषमानयेत्युक्ते राजपदप्रयोगात् राजसंबन्धविशिष्टपुरुषस्येवात्र नञः प्रयोगात् "नञ्विशिष्टस्यानयनं भविष्यति । कः पुनरसौ ? निवृत्तपदार्थकः।"(महाभाष्यवचनम्.२.२.६) इत्युक्तम् । तत्र कैयटः "निवृत्तः निर्गतः पदार्थो मुख्यं ब्राह्मण्यं यस्मिन् सः क्षत्रियादिरित्यर्थः। सादृश्यादिनाऽध्यारोपितब्राह्मण्यो नञ्द्योतिततदवस्थः" इति व्याचष्ट । निवृत्तपदार्थक इतिभाष्यस्य नञोऽभावार्थसाधकत्वं तु न युक्तम् । "कः पुनरसौ ?" इति प्रश्नवाक्ये अदश्शब्देन पूर्वप्रक्रान्तनञ्विशिष्टार्थस्य परामर्शात् । अतः उत्तरवाक्ये निवृत्तपदार्थक इत्यत्रान्यपदार्थो नञ्विशिष्ट एव, न तु नञ् । किञ्च "यदि स्वाभाविकी निवृत्तिः, किं नञ् प्रयुज्यमानः करोति ?" इत्यग्रिमभाष्यसन्दर्भेण नञा समभिव्याहतपदार्थनिवृत्तिरेवोपपादिता । एवं च तद्भाष्येण समासे नञ आरोपितत्वद्योतकत्वं स्पष्टमेवोपलभ्यते, न त्वभावार्थकत्वमिति बोध्यम् ।

## ९. वाक्ये नञ्पदार्थान्वयविचार:-

असमासे "घटो नास्ती" त्यादावत्यन्ताभावो नञ्वाच्योऽर्थः । नञस्तद्योतकत्वे तु "यद्योत्यं तद्विशेषणम्" इति न्यायात् स्त्रीप्रत्ययादिद्योत्यस्त्रीत्वादिवत् तदर्थाभावस्य समभिव्याहृतपदार्थविशेषणतयाऽन्वयापत्याऽभावमुख्यविशेष्यकशाब्दबोधानुपपत्तिः, प्रतियोगिमुख्यविशेष्यकशाब्दबोधापत्तिश्च । अत: नञवाच्यार्थ अत्यन्ताभाव: । तदनु घटपदार्थस्याऽऽख्यातार्थकर्तर्यभेदेनान्वयः, तस्य चाधेयतया धात्वर्थसत्तायाम्, तस्याश्च नञर्थाभावे इति घटाभिन्नकर्तृनिष्ठसत्ताप्रतियोगिकाभाव इत्याकारकः शाब्दबोधः । तदुत्तरं घटात्यन्ताभावविषयकमानसबोधो जायते । न चात्र घटपदार्थस्य प्रतियोगितया नञर्थाभावान्वयित्वं स्वीकृत्य नञ: स्वान्वयिप्रतियोगिकाभावबोधकतया घटप्रतियोगिकात्यन्ताभाव एव शाब्द इति वाच्यम् , चैत्रो न पचति, घटो न जायते इत्यादौ पाकादिक्रियानिषेधस्यैव लोकप्रतीतेः नञर्थाभावस्य क्रियान्वयित्वस्यैव युक्तत्वात् । तथाहीयमभियुक्तोक्ति:-

*"प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञि"ति । (मिश्र,सन् २००६,पृ.९९)*

एतदनुरूपेण च असमस्तनञर्थात्यन्ताभावविशेष्यकबोधे तिङ्समभिव्याहृतधातुजन्यक्रियोपस्थिति: कारणमिति कार्यकारणभाव एव कल्प्य इति यत्र भूतले न घटः इत्यादौ तिङन्ताप्रयोगः, तत्रापि "अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ति" इत्यनभिहितसूत्रस्थभाष्यप्रामाण्यादस्तीत्यध्याहारः कर्तव्यः । अत एव "तिङ्गमानाधिकरणे प्रथमा" इति वार्तिकमतं संगच्छते, अन्यथा घटादिशब्दानां नञर्थात्यन्ताभावेऽन्वय इति तिङ्सामानाधिकरण्याभवात् प्रथमा नैव स्यात् । एवमेव न त्वं पचसि, अहं नास्मि, घटो नास्तीत्यदौ युष्मदाद्यर्थस्य प्रतियोगितया नञर्थान्वयित्वे युष्मदादेः तिङ्सामानाधिकरण्याभवात् "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यम:" इत्याद्यनुशासनलभ्यपुरुषव्यवस्थायाश्चानुपपत्ति: । न च तिङर्थसङ्ख्यान्वयित्वरूपस्य सामानाधिकरण्यस्य सत्वात् न पूर्वोक्तानुपपत्तिरिति वाच्यम्, तस्य सामानाधिकरण्यपदार्थत्वाभावात् । न ह्यत्र 'नीलो घट:' इत्यादाविव भिन्नप्रवृत्तिनिमित्तकत्वविशिष्टैकार्थप्रतिपादकत्वरूपं सामानाधिकरण्यमस्ति । किञ्च द्व्येकयोरित्यादेः "तिप्तस्-" इत्यादिसूत्रैकवाक्यतापन्नत्वेन "एकत्वे तिप्" इत्यादिवाक्यार्थे निष्पन्ने, कस्यैकत्वे ? इत्याकाङ्क्षायां प्रत्यासत्या समानप्रत्ययोपात्तत्वेन "तिबाद्यर्थकर्त्राद्यन्वयिनः"(पेरि.सन्१९८७,पृ.१३८)इत्यर्थस्यैव लाभेन घटादिपदार्थस्याभावान्वयित्वाभ्युपगमे तिङर्थान्वयित्वाभावेन तेषां तन्निष्ठसङ्ख्याबोधकत्वानुपपत्ति: । अत: नञर्थात्यन्ताभावस्य प्रतियोगितया क्रियायामेवान्वय:, घटप्रतियोगिकात्यन्ताभावविषयकबोधस्तु पाश्चात्कालिक: मानस इति बोध्यम् ।

## १०. निष्कर्ष:-

अघ**ट** इत्यादौ समासघटकनञ आरोपितत्वं द्योत्योर्थ इति तस्मादारोपितघटत्ववानिति बोधो जायते । एवञ्च "आरोपितत्वं नञ्द्योत्यम्" इति पक्ष एव भाष्यसम्मतः । तत्रैव 'असः' 'अनेकम्' इत्यादीनां साधुत्वम्। "अभावो नञर्थ:" इति पक्षो नैयायिकमीमांसकादिसम्मतः । सोऽपि यकिथञ्चित्समर्थयितुं शक्य इत्याशयेन 'अभावो वा तदर्थस्तु भाष्यस्य हि तदाशयात्' इति वैयाकरणमतोन्मज्जनकारिकायां प्रदर्शितमिति बोध्यम् । । मूलोक्तरीत्या तत्समर्थनेऽपि तत्रार्थे 'अस:' इत्यादीनामसाधुत्वं तु स्यादेव । मुनित्रयसम्मतेऽर्थे एव शब्दानां साधुत्वस्य सर्वसम्मतत्वात्। मीमांसकादिभिरादृते पक्षेऽपि "नञ्- सूत्रस्थं भाष्यं मानं कथञ्चित् भवितुमर्हतीति सम्भावनया तत्प्रदर्शितम्। वस्तुतस्तु न नञ्सूत्रस्थं भाष्यं नञ: अभावार्थकत्वे मानम् । तथा हि- भाष्ये नञ्तत्पुरुषस्योत्तरपदार्थप्राधान्ये "अब्राह्मणमानय" इत्युक्ते ब्राह्मणमात्रस्यानयनं

प्राप्नोतीत्याशङ्क्य, राजपुरुषमानयेत्युक्ते राजपदप्रयोगात् राजसंबन्धविशिष्टपुरुषस्यैवात्र नञः प्रयोगात् “नञ्विशिष्टस्यानयनं भविष्यति। कः पुनरसौ ? निवृत्तपदार्थकः।" इत्युक्तम्। तत्र कैयटः "निवृत्तः निर्गतः पदार्थो मुख्यं ब्राह्मण्यं यस्मिन् सः क्षत्रियादिरित्यर्थः। सादृश्यादिनाऽध्यारोपितब्राह्मण्यो नञ्द्योतिततदवस्थः"(श्रीभार्गव,सन्२०२३पृ,४२५) इति व्याचष्ट। निवृत्तपदार्थक इतिभाष्यस्य नञोऽभावार्थसाधकत्वं तु न युक्तम्। “कः पुनरसौ ?” इति प्रश्नवाक्ये अदश्शब्देन पूर्वप्रक्रान्तनञ्विशिष्टार्थस्य परामर्शात्। अतः उत्तरवाक्ये निवृत्तपदार्थक इत्यत्रान्यपदार्थो नञ्विशिष्ट एव, न तु नञ्। एवञ्च नञ्विशिष्टस्य निवृत्तपदार्थकत्वोक्तौ पूर्वोक्तरीत्या कैयटव्याख्यानानुसारेण च आरोपितत्वं नञर्थ इति स्पष्टमेवेति भावः।

प्रादयो द्योतकाश्चादयो वाचका इति नैयायिकाः। निपातानां सर्वेषां द्योतकत्वं वाचकत्वं वा अस्तु , केषाञ्चित् द्योतकत्वं केषाञ्चित् वाचकत्वन्तु न युक्तम्, अर्धजरतीयस्यान्याय्यत्वादिति दीक्षितादयः। नागेशभट्टास्तु प्रादीनां द्योतकत्वमेव, तदितरेषान्तु वाचकत्वं द्योतकत्वमपीति मन्वते। तत्र नैयायिकरीत्या नञः वाचकत्वमेव। वैयाकरणसिद्धान्ते तु आरोपितत्वं नञ्द्योत्यमेव, न तु वाच्यमिति बोध्यम्।

## कृतज्ञताज्ञापनम्

शोधस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च साधु परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यः विशेषज्ञेभ्यः गुरुजनेभ्यश्च सहायकेभ्यश्चान्येभ्यः हार्दं कार्तज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थसूची-

द्विवेदी, श्रीब्रह्मदत्तः(सन्१९८५) श्रीकौण्डभट्टकृत-वैयाकरणभूषणसारः(दर्पणहिन्दीभाष्योपेतः) । चौखम्बा ओरियन्टालिया , वाराणसी- २२१००१।

शास्त्री, महामहोपाध्यायपेरिसूर्यनारायण(सन्२०१६) श्रीकौण्डभट्टकृत-वैयाकरणभूषणसारः । श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति-५१७५०२।

पेरि,महामहोपाध्यायसूर्यनारायणशास्त्री (सन्१९८७) श्रीनागेशभट्टकृतवैयाकरणसिद्धान्तलघुमञ्जूषा । राष्ट्रियसंस्कृतविश्वविद्यालयः(केन्द्रियविश्वविद्यालयः), तिरुपति-५१७५०२।

श्रीभार्गव, शास्त्री (सन्२०२३) महर्षिः पतञ्जलिः, महाभाष्यम्, चौखम्बा संस्कृत प्रतिष्ठान।

श्रीनागेशभट्टः, (सन् २००६), परमलघमञ्जुषा (वंशीधरमिश्रविरचितवंशीव्याख्योपेता). वाराणसी : चौखम्बा सुरभारती प्रकाशन।

पाणिनिसूत्रम्, अष्टाध्यायी प्राविधिकमाध्यमेन {ashtadhyayi.com(app)} नीलेश बोडस।